श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री पार्थसारथिदासेन कृतं

# ॥ श्री पद्मावतीस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री पद्मावतीस्तोत्रम् ॥

विष्णुपत्नि जगन्मातः विष्णुवक्षः स्थलस्थिते।
पद्मासने पद्महस्ते पद्मावति नमोऽस्तु ते॥ 1 ॥

वेङ्कटेशप्रिये पूज्ये क्षीराब्धितनये शुभे।
पद्मे रमे लोकमातः पद्मावति नमोऽस्तु ते॥ 2 ॥

कल्याणि कमले कान्ते कल्याणपुरनायिके।
कारुण्यकल्पलतिके पद्मावति नमोऽस्तु ते॥ 3 ॥

सहस्रदळपद्मस्थे कोटिचन्द्रनिभानने।
पद्मपत्रविशालाक्षि पद्मावति नमोऽस्तु ते॥ 4 ॥

सर्वज्ञे सर्ववरदे सर्वमङ्गळदायिनि।
सर्वसम्मानिते देवि पद्मावति नमोऽस्तु ते॥ 5 ॥

सर्वहृद्दहरावासे सर्वपापभयापहे।
अष्टैश्वर्यप्रदे लक्ष्मि पद्मावति नमोऽस्तु ते॥ 6 ॥

देहि मे मोक्षसाम्राज्यं देहि त्वत्पाददर्शनम्।
अष्टैश्वर्यं च मे देहि पद्मावति नमोऽस्तु ते॥ 7 ॥

नक्रश्रवणनक्षत्रे कृतोद्वाहमहोत्सवे।
कृपया पाहि नः पद्मे त्वद्भक्तिभरितान् रमे॥ 8 ॥

इन्दिरे हेमवर्णाभे त्वां वन्दे परमात्मिकाम्।
भवसागरमग्नं मां रक्ष रक्ष महेश्वरि॥ 9 ॥

कल्याणपुरवासिन्यै नारायण्यै श्रियै नमः।
श्रुतिस्तुति प्रगीतायै देवदेव्यै च मङ्गळम् ॥ **10** ॥

॥ श्री पद्मावतीस्तोत्रं समाप्तम् ॥